ओ३म्।

हिमालयान्तर्गत-काङ्गड़ी-गुरुकुल-विश्वविद्यालय-

प्रथमायुर्वेदसम्मेलनस्य

सभापतेः

कलिकातामहानगरीवास्तव्यस्य

आयुर्वेदाचार्य्यस्य श्रीयुततराचरणचक्रवर्त्ति-

व्याकरणतीर्थ-कविभूषणायुर्वेदशास्त्रि-कविराजमहाशयस्य

अभिभाषणम्

काङ्गड़ीगुरुकुले प्रथमायुर्वेदसम्मेलने

१९२२तमे खीष्टाब्दे अभिभाषितम्।

THE AYURVEDIC CONFERENCE.

FIRST SESSION

KANGRI GURUKULA, 1922,

Presidential Address

Delivered by

Ayurvedacharya Kaviraj

TARA CHARAN CHAKRAVARTI,

Vyakaranatirtha, Kavibhushana, Ayurvedashastri.

Published by

Br. JANMEJOY VIDYALANKAR,

General Secretary, Kangri Gurukul Ayurvedic Conference.

ओ३म् ।

ज्योतिष्मतीं जगद्ग्रामं भासयन्तीं च भास्वतः ।
जन्यानां जननीं वन्दे मर्त्यामरशिवां शिवाम् ॥
चिकित्साप्राभृतं प्राणाभिसरं भिषजां वरम् ।
कविराजं गुरुं भक्त्या धर्म्मदासं नमाम्यहम् ॥

ब्रह्मनिष्ठा ब्रह्मचारिणः, मान्या मातरः, सौम्याः सामाजिक-महोदयाश्च !

समितिरियमायुष्या, समिद्धबोधविद्यावृद्धविद्वद्वृन्दविभूषिता, शीतशिखरस्वभावप्रभावसौम्या, समन्ततः सुरसरित्सम्पर्क-विशुद्धिभाग्वनोपवनराजिसुशोभितशालसरलतालतमालकृतमाल-नक्तमालपियालपीलुबलादिविविधवनस्पतिवानस्पत्यौषधवीरुद्धि-मण्डितशिक्षाश्रमरमणीया, तपस्योपवास-ब्रह्मचर्य्य-व्रतपरायण-मैत्रीपरविद्यार्थिजनमन्त्रपूतघृताहुतिसमुद्भूत-सात्त्विकभावतिरो-हितसकलजनचित्तकलुषवृत्तिप्रशान्तश्वापदव्यापारा, विमल-विपुलसत्त्वशमदमपर्य्यवदातश्रुतप्रथितसर्वायुर्वेदप्रबोधप्रचुरबुद्धि-चिकित्सकाध्युषिता, सुतरामेव आयुर्वेदप्रचारार्थप्रवृत्तानां महर्षीणां पूर्वसमागमवार्त्तां स्मारयति सभ्यमहोदयान् ।

पुरा हि किल एतादृश्येव हिमवत्प्रदेशे पीड़ापरितापतप्त-

प्राणिनामाक्रोशमसहमानैरनुक्रोश[illegible]

ज्ञानशालिभिरङ्गिरोजमदग्निकाश्यपभृगुप्रमुखैः दिव्यचक्षुभि-राप्तैर्महर्षिभिः समाहूताऽऽसीदायुर्वेदस्य प्रथमप्रचारार्थं मर्त्यलोके एवंविधा समितिः। तस्यां खल्वासीदग्रणीरुग्रतपा मुनिर्भरद्वाजः, यः स्वमहिम्ना सुरेश्वरसकाशादायुर्वेदं बुबुधे, शशंस शिष्येभ्यः, स्वयञ्चामितमायुर्लेभे।

अथ कालवशाद्धीयमानस्यास्यायुर्वेदस्य पुनः प्रवृद्धिसाधन-तत्परैः तत्रैव पुण्यभूमौ पुण्यव्रतैर्गुरुकुलवासिभिः संस्थापिता महोपकारा परिषदिति साधुस्तत्रभवतां भूतेष्वनुक्रोशः। अस्य च सदसः वार्षिकं सम्मेलनं सम्पादयद्भिः श्रीमद्भिर्मादृशो जनः सभापतिपदे नियुक्त इति सहस्रशो धन्यवादैः प्रणामाभि-नन्दनादिभिश्च भवतः सम्भावये। असम्भावितस्य मे ईदृशः सम्मानलाभः श्रीविभूतिमदूर्जितसत्त्वानां परमकारुणिकानां ब्रह्मभूयंगतानां भगवतां दयानन्दस्वामिमहोदयानां नित्यशुद्ध-बुद्धस्वरूपस्याशरीरिण आत्मनः तथा साक्षाद्वैदिकधर्म्मा-वताराणां त्यागिकुलचूड़ामणीनां सकलजनश्रद्धाभाजनानां श्रीमतां श्रद्धानन्दस्वामिमहोदयानां भवताञ्च महत्या अनुकम्पायाः फलमेवावितथं व्यनक्ति। परमात्मनोऽयोग्यतां कार्य्यगौरवञ्चा-वेक्ष्य संशयाकुलहृदयोऽहं भवद्भ्यः समर्पयाम्यात्मानमतो महो-दारैः भवद्भिः क्षन्तव्या मे मन्तुर्मन्तव्यत्रुटिः।

सभ्यमहोदयाः,

भ्रश्यति कृतयुगे सर्वार्थत्यागिनां सर्वजनहितैकव्रतानां ब्रह्मर्षीणामिव कलिकल्मषक्लिष्टान् विविधव्याधिकवलितान् स्वजनशोकैः विक्रोशतः मानवानभिसमीक्ष्य पूर्वाचार्य्यश्रेष्ठैः

कल्पानां परपरमार्थपरिचिन्तनपरायणानां मनस्विनामिदानीं दृश्यते तत्प्रतिकारार्था महती कार्य्यतत्परता। अतः समुचितोऽयं समारम्भ आयुर्वेदोन्नतिविधानस्य। नहि ऋते विधूतताद्दृश-तमसां साहचर्य्यात्सम्पद्यतेऽनुजीविभिः सुमहत्कार्य्यं किमपि। तथाहि—

"किं प्राभविष्यदरुणस्तमसां वधाय
तञ्चेत्सहस्रकिरणो धुरि नाकरिष्यत्" ॥

परमत्रापि न दृश्यते सर्वथा विप्रतिपत्तिरहितः समारम्भः। सन्ति ह्येके सुयोगजल्पाः स्वोन्नावितसिद्धान्तसत्यनिश्चयाः, येऽसत्येनैव सत्यमनुसन्धित्सवः संक्षोभयन्ति सरलानां चेतांसि।

सम्प्रति हि साम्पन्निकाः केचन भारतीयाः पाश्चात्यचिकित्सा-शिक्षापद्धतिमिव स्वर्ग्यां यशस्याञ्च मन्यमानाः तयैव प्राधान्येन विलुप्तानि आयुर्वेदाङ्गानि सम्पूरयितुमुपदिशन्ति। आपात-रमणीयमयाचितसौहृद्यमनुशासनमिदं प्राकृतजनसन्निपाते सुश्राव्यमपि न कथञ्चन यथार्थग्राहिणो बुद्धिमन्तः प्रशंसन्ति। नहि किञ्चित् पाश्चात्य चिकित्साविज्ञानं सर्वथा पूर्णमस्ति येनायु-र्वेदतन्त्रं पूर्णतां लभेत, तथाहि सति न पाश्चात्या इन्फ्लुएञ्जा-दिभिर्जनपदध्वंसकरैर्व्याधिभिरप्राप्तकालं म्रियेरन्। एतेनैव च दृष्टान्तेन नवा सन्ति आयुर्वेदशास्त्राण्यपि पूर्णानि यैर्याव-द्व्याधिनिग्रहे मृत्युनिग्रहे च विमुक्तसन्देहाः कुशलाः भवेयुः। वस्तुतस्तु पूर्णब्रह्म विहाय न किञ्चिदस्ति जगति पूर्णं वस्तु।

लोकायतिकसत्यनिष्ठयापि नैकान्तग्राहिणो भवितुमर्हन्ति पाश्चात्यचिकित्साविज्ञाने विज्ञाः भारतीयाः। विभिन्नानि हि

प्रतिदेशपुरुषप्रकृतिनामवस्थानानि यानि तत्तद्देशपुरुषप्रकृति-विशेषोपयोगभाञ्जि भजन्ते भद्राणि।

अस्मिन् प्रसङ्गे इदमपि च विभाव्यं यदधुना लभ्यमानानि चायुर्वेदशास्त्राणि न तावत् पाश्चात्यचिकित्सकापातरमणीय-नवाविष्कृततत्त्वप्रतियोगितासहानि न वाविर्भवन्ति प्रेक्षा-वन्तश्चरकप्रतिभानुकारिणः प्रतिसंस्कर्त्तारः भारतीयचिकित्सकेषु ये तथाविधानि भारतीयसात्म्यप्रतिकूलानि मतानि प्रतिहत्य प्रचारयेयुः प्राणहिततत्त्वानि प्राणाचार्य्याः। एतदपवाद-परिजिहीर्षयैव केचन प्रथितप्रभावाः वैद्याः साम्प्रतं पाश्चात्य-प्रथामिवानुसृत्य वैद्यकपाठशालाः संस्थापयन्ति, समनुप्रवेश-यन्ति च तत्र पाठविधावपि पाश्चात्यपुस्तकानि। आयुर्वेदशास्त्रस्य शाश्वतपाठविधिं परित्यजतां स्वनुष्ठितमिव च परकीयसिद्धान्तं समाग्रहयतां तेषां प्रवृत्तिरेषा स्वार्था परार्था वा भवतु न तामालोचयितुमिच्छामि। परमत्र देशसुहृदां श्रीमच्चित्तरञ्जन-दास (Mr. C. R. Das) महोदयानां वाक्यमिदं भूयो भूयः स्मर्त्तव्यमनुविधातव्यञ्च सर्वैः। यदुक्तं तत्रभवद्भिः जातीयमहा-सम्मेलनाभिभाषणे "पाश्चात्यशिक्षारूपमतिथिं सत्क्रियमाणै-रस्माभिः स्थापनीयमतिथिसमादरात्प्रागेव स्वकीयं गृहमेकम्। प्राक् च पाश्चात्यशिक्षाग्रहणाज्ज्ञातव्या भारतीयैः स्वकीया सत्ता। स्वसत्तामनुपलभ्य न तावद् भारतीयाः पाश्चात्यशिक्षा-मनुकुर्वन्तोऽपि सत्यत्वेन ग्रहीतुमर्हन्ति।" वयमपि "श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात्स्वनुष्ठितात्। स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः" तथा "सहजं कर्म्म कौन्तेय सदोषमपि न

त्यजेत्। सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥" इति भगवद्वाक्यद्वयं प्रमाणीकृत्य पुनः पुनः प्रार्थयामहे यत्काममनुकुर्वन्तु श्रीमन्तः अनुकरणप्रियाः पाश्चात्यचिकित्साम्। परं न कथमपि भवद्भिः विलोपनीया, विशोधनीया वा पाश्चात्यप्रज्ञया अवितर्क्यस्मृतिविभागविदां निष्प्रीत्युपतापदर्शिनामाप्तानामिहामुष्मिंश्च लोके हिततमा चिकित्सापद्धतिः। असंशयं हि खल्वाप्तं वचनं भवति यद्व्याहरति भगवान् पतञ्जलिः "रजस्तमोभ्यां निर्मुक्ता तपोज्ञानबलेन ये। येषां त्रिकालममलं ज्ञानमव्याहतं सदा। आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयं। सत्यं वक्ष्यन्ति ते कस्मान्नासत्यं नीरजस्तमाः॥"।

अत्रैके प्राकृतचक्षुष आधुनिकाः वैज्ञानिकाः राजप्रतापाद्द्रव्यप्राचुर्य्याद्वा मृतशरीरव्यवच्छेदाधीशा मृतशरीराणि व्यवच्छिद्य यन्नाम प्रत्यक्षतः शारीरज्ञानमाविष्कृतवन्तस्ते प्रत्यक्षज्ञानेन आप्तप्रदर्शितशारीरज्ञानस्यासादृश्यमवेक्षमाणाः आर्षशारीरज्ञानमप्रत्यक्षमूलकमवैज्ञानिकञ्च विवेचयन्ति। वयमपि सुश्रुते चरके चोपलभामहे पाश्चात्यशारीरतत्त्वविरोधिवाक्यानि। परं न तानि मिथ्या प्रतिपादयामो वयं, न वा प्रतिपत्तुमर्हन्ति प्रेक्षावन्तः। महर्षयो हि तपःप्रभावादमलसत्त्वसमासीनाः दिव्यचक्षुषः सदाप्रत्यक्षीकुर्वन्तः शरीरिसमवायशारीरतत्त्वानि अध्यात्मशरीरविभागविदो भवन्ति। तेषामेवं गुणयोगाच्चैतन्यसमाश्रितशरीरविश्लेषणपराणां शारीरतत्वानि सर्वदैव मृतशरीरव्यवच्छेदमात्रसर्वस्वानां जड़वैज्ञानिकानां शारीरज्ञानेन ऐक्यमविदधत्यपि सत्यत्वेन विशिष्टवैज्ञानिकत्वेन च वरीवर्तन्ते।

पाश्चात्या हि जड़विज्ञानकुशला: लोके। नहि जड़विज्ञानं (Physical Science) अध्यात्मयोगिविषयविश्लेषणक्षमं भवति। तत्र हि केवलं दिव्यचक्षुष एव प्रभवन्ति इति "न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरमिति" भगवद्वाक्यात्स्पष्टं विज्ञायते।

इदञ्चेदञ्च नः प्रत्यक्षं यज्जीवितशरीरे यावन्तो भावविशेषाः न ते मृतशरीरे समुपलभ्यन्ते। न तस्मात् मृतशरीरज्ञानमात्र-माश्रित्य जीवितशरीरस्य कृत्स्ने ज्ञानेऽवैज्ञानिकत्वमारोपयितु-मध्यवस्यन्ति विमुक्तसन्देहाः साधवः।

अथापरे भाषन्ते यत् त्रिदोषान्तर्निविष्टा आयुर्वेदीय-चिकित्सा न विज्ञानसंमता इति अत्र ब्रूमः—चिकित्सा खलु सर्वत्रैव व्याधितानां व्याधिपरिमोक्षार्थं स्वस्थस्य स्वास्थ्यरक्षार्थं च परिदृश्यते। अत्राह भगवान् धन्वन्तरिः "इह खल्वायुर्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य स्वास्थ्यरक्षणञ्च" तत्र व्याधितानां व्याधिपरिमोक्षार्थमायुर्वेदविद एतानुपायाननु-मन्यन्ते। तद्यथा—"अनातुरेण भेषजेन आतुरं चिकित्सामः, क्षाममक्षामेन, कृशं दुर्बलमाप्याययामः, स्थूलं मेदस्विनमपतर्पयामः शीतेनोष्णाभिभूतमुपचरामः, शीताभिभूतमुष्णेन, न्यूनान्धातून् पूरयामः, व्यतिरिक्तान्ह्रासयामः, व्याधिं मूलविपर्ययेणोपचरन्तः सम्यक् प्रकृतौ स्थापयामः, तेषां नस्तथाकुर्वतां भेषजसमुदायः कान्ततमो भवति"। पाश्चात्यचिकित्सका अपि एतानेवो-पायान्सर्वत्र चिकित्सायामनुवर्त्तन्ते। तथा कुर्वतां तेषां चिकित्सा यदि वैज्ञानिकी भवेत्तर्हि तथाविधिविहिताया आयुर्वेदीय-

चिकित्सायाः कथमवैज्ञानिकतादोषो नवावतार इति समीक्ष्यकारिभिः लोकचरित्रेक्षणकुशलैरेव विवेचनीयम् ।

सत्यमेतद्यदधुना पूर्वतरैर्वैद्यैरनुपदिश्यमाना "इञ्जेक्शनाख्या" काचनाभिनवा चिकित्सा पाश्चात्यचिकित्सकैराविष्कृता, यां खलु महाभ्युदयां महाफलां च मन्यमाना नवीना भारतीयचिकित्सका अपि आयुर्वेदस्य विश्वचिकित्साज्ञानाकरत्वसिद्ध्यर्थं रसवैद्यानां "सूचिकाभरणरस" दृष्टान्तमुपन्यस्य आयुर्वेदसम्मतां व्याहरन्ति । परं लभ्यमानायुर्वेदपर्य्यालोचनपरम्परया नैवंभूतां चिकित्सामायुर्वेदसम्मतां प्रतिपादयन्ति कुशलाः । इन्जेक्शनाख्यया हि (Injection) प्रक्रियया प्रायः शिराभिः प्रविचार्य्यमाणमौषधं शोणितवेगसम्पर्कात्सर्वशरीरं व्याप्नुवदाशु एव शुभाशुभाभिनिर्वृत्तिप्रत्ययभूतं भवति । रोगं प्रशमयच्च प्रायो रोगान्तरमप्युत्पादयति । इत्थंभूतो भैषज्यप्रयोगः नार्षवैद्यकशास्त्रानुमतः । यदुक्तं चरके "प्रयोगः शमयेद्व्याधिं योऽन्यमन्यमुदीरयेत् । नासौ विशुद्धः शुद्धस्तु शमयेद्यो न कोपयेत् ॥"

महानुभावाः !

एतदपि द्रष्टव्यं यत् सर्वस्यैव कर्म्मणस्त्रिविधं फलं भवति—इष्टमनिष्टं मिश्रञ्च । प्राच्यं पाश्चात्यं वा चिकित्साविज्ञानं नैतत्कदापि त्रित्वमतिवर्तते । तस्मान्न मोहादेकान्तग्राहिणो भवन्ति परीक्षकाः एतद्विवेकवशवर्त्तिनः केचित् इञ्जेक्शनविधिं तथा कुइनाइनादीनि पाश्चात्यभेषजानि देशीयवैद्येषु प्रवर्तयितुं निबन्धयितुञ्चेच्छन्ति तत्तद्रोगाधिकारे वैद्यकशास्त्रे । न वयं

तदाद्रियामहे। तानि हि औषधानि विदेशादेव वैदेशिकाः बणिजः भारते प्रवेशयन्ति। तेषामौषधानां निर्म्माणप्रणाली तदध्यक्षैरेव विदिता वर्त्तते। अपरदेशीयास्तत्र न प्रवेष्टुं पर्य्येष्टुं वार्हन्ति। अत्र प्रमाणमपि न दुर्लभं भवेत्। यतः अस्मद्देशीयाः पाश्चात्यचिकित्सका अत्र साक्षात्प्रमाणभूताः विराजन्ते। अद्धाहि ते परप्रणीतानि परवृत्तिपुष्टिकराणि च भेषजानि प्रयुञ्जन्त्यातुरशरीरे। परं न तदौषधनिर्माणे तद्विधाः प्रभवन्ति। एवं हि दुष्प्रापोपादानानि अज्ञातनिर्म्माणविधिकानि चौषधानि यदि आयुर्वेदशास्त्रे उपनिबद्धानि भवेयुस्तर्हि दैवात्कालचक्र-नियमाद्वा तदौषधानामलाभेऽसंभवे वा अनायासलभ्यौषध-व्यवहारेणानभ्यस्तकर्म्मणामस्माकं परवर्त्तिनोऽन्ववायाः कथमात्म-रक्षां लोकरक्षां वा कुर्य्युः। किञ्चेदमपि प्रत्यक्षं यत्ता-न्यौषधानि यथा तद्देशीयानामैकान्तहिततमानि न तथा सात्म्यानुरोधात् चेन्द्रदौर्बल्याद्वा एतद्देशीयानामारोग्यपुष्टिकराणि समुपलभामहे।

आर्य्यमिश्राः!

एवं द्विविधा आयुर्वेदोन्नतिवार्त्ता श्रूयते लोके, पाश्चात्य-प्रथानुसारिणी आर्षमतानुयायिनी च। पूर्वोक्तकारणं भूयो भूयो विचिन्तयन्तो न वयं सर्वथा पाश्चात्यचिकित्सामनुमोदितु-मुत्सहामहे आयुर्वेदीयचिकित्सायामन्यत्र शस्त्रप्रणिधानात्, इतो हि आयुर्वेदीयचिकित्सकाः साम्प्रतं यमादिवोद्विजन्ते। परं लभ्यमानसुश्रुततन्त्रमविच्यावेच्य स्पष्टमिदं प्रतीयते यत्पुरा-सीद्भारतेऽस्त्रचिकित्सायाः महती समुन्नतिः। अतिकष्टसाध्ये

मूढगर्भोद्धारणेऽश्मरीसमाहरणे चायुर्वेदोत्कर्षः पाश्चात्यचिकित्सकैरपि स्पष्टतया स्वीकृतः। अत्र वैद्यकशब्दसिन्धुनामकग्रन्थभूमिकायां तत्रभवता उमेशचन्द्रकविराजमहोदयेन यल्लिखितं तदुल्लिख्यते :—

"The subjects of मूढ़गर्भ and अश्मरी which relate to difficult delivery and operation of stone respectively are treated in so masterly a manner, that Dr. Charles (the then Principal of the Calcutta Medical College) desired to see them. At his request, Dr. Durgadas Gupta, and myself translated them into English and submitted the said for his perusal. Dr. Charles highly praised the process of delivery in difficult cases and even confessed, that, with all his great experience in midwifery and surgery, he never had any idea of the like being found in all the medical works that came under his observations."

(Vaidyaka Shabdasindhu, Preface, Page 36.)

परमिदानीं वैद्यानां प्रमादात् श्रुतिमात्रपर्य्यवसाना संजाता सौश्रुती अस्त्रचिकित्सा। अतस्तत्प्रतिविधातुं यतेत। अत्र पाश्चात्यचिकित्सकानां साहाय्यं न कथमपि परिहरणीयम्। ते हि साम्प्रतं शस्त्रावचारणे निःसंशयं प्रशंसनीया भवन्ति। संज्ञाविलोपे "क्लोरोफर्म" (Chloroform) प्रयोगस्तेषामतीव

प्रशस्यः, तस्मात् "कृत्स्नो हि लोको बुद्धिमतामाचार्य्यः शत्रुश्चाबुद्धिमतामितश्चाभिसमीक्ष्य बुद्धिमता धन्यं यशस्यमायुष्यं पौष्टिकं लौकिकमभ्युपदिशतो वचः श्रोतव्यमनुविधातव्यञ्च" इति चरकवचनात्तथाविध "क्लोरोफर्मा" दिप्रयोगसौष्ठवं शस्त्रादिकञ्च तेभ्यो आदातव्यम्। आदाय च गुणेन कर्म्मणा वा तत्प्रतिरूपकमेतद्देशीयभिषजमाविष्कर्तुं प्रयतितव्यम्। न च मोहात्प्रमादाद्वा चिरं परमुखापेक्षिणो भवेयुः।

अत्र राजानुकूल्यमवश्यमेवैष्टव्यं भवेत्। शस्त्रकर्म्माणि हि प्रतिविषयं राजानुमतिमपेक्षन्ते। यदाह सुश्रुतः "उत्कर्षणापकर्षणस्थानापवर्त्तनोत्कर्त्तनभेदनच्छेदनपीड़नर्जुकरणदारणानि-चैकहस्तेन गर्भं गर्भिणीं चाहिंसता, तस्माच्चाधिपतिमापृच्छ्य परञ्च यत्नमास्थायोपक्रमेत।"

तस्मादायुर्वेदीयास्त्रचिकित्सोत्कर्षसाधनसमाधिभिः सुधिभिः विद्यार्थिभिरादावध्येतव्यः प्रज्ञालाभार्थं सौश्रुतोऽस्त्रचिकित्साग्रन्थः। ततः स्वदेशे परदेशे वा पाश्चात्यास्त्रचिकित्साविद्यालयं प्रविश्यास्त्रप्रयोगोऽभ्यसितव्यः। अथ प्राच्य-पाश्चात्यचिकित्साशास्त्रं समालोच्यात्मनो गौरवं लाघवं च परीक्ष्य कर्म्मसु प्रयतितव्यम्। पाश्चात्यविद्यालयप्रवेशासम्भवे प्रथमतोऽधीतो सुश्रुते विद्यार्थी कर्म्माभ्यासार्थमस्त्रोपचारप्रथितयशसं पाश्चात्यास्त्रचिकित्सकमुपासीत। तेषामुपदेशं साहचर्य्यं च समाश्रित्य सर्वदा कर्म्म कुर्य्याद्वा। प्राग् राजानुमोदनादेतदतिरिक्तं नान्यत् किमपि साधनमस्माकमायुर्वेदीयास्त्रचिकित्सासमुन्नतये सुष्ठु प्रतिभाति।

सभ्यमहोदयाः !

आयुर्वेदस्य सर्वाङ्गसुन्दरः कायचिकित्साविधिरपि भारतीयानामनादरात्समुचितशिक्षोपदेशाभावाच्च प्रतिदिनं हीनाया अपि हीनतरां दशामधिगच्छति। यद्यपि प्रतिनियतमेतदर्थं संस्थाप्यन्ते बहवो वैद्यविद्यालयास्तथापि तत्र रोगिनिवासादीनामसद्भावात् प्रत्यक्षशिक्षाविमुखाः वैद्यकशास्त्राक्षरमात्राभ्यासपराः विद्यार्थिनः प्रायशः कर्मक्षेत्रे विफलमनोरथाः भवन्ति। उभयज्ञा हि भिषजश्चिकित्सां कुर्वन्तश्चिकित्साफलभाजो भवन्ति। तदुक्तम् "यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः। स मुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम्॥ यस्तु कर्मसु निष्णातः धाष्टर्याच्छास्त्रबहिष्कृतः। स सत्सु पूजां नाप्नोति वधं चार्हति राजतः॥ यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने। आहवे कर्म निर्वोढुं द्विचक्रः स्यन्दनो यथा॥"

एतदर्थं हिमाद्रेर्विन्ध्यपर्वतस्य वा सन्निधौ जनवति प्रदेशे स्थापनीया रोगिनिवाससमिताः सकर्मशालाः वैद्यकविद्यालयाः। यत्र परिदृष्टकर्माणः पर्यवदातश्रुताः भिषजोऽध्यापनार्थं प्रयतेरन्। विद्यार्थिनश्चार्य्यप्रकृतिसम्पन्नाः सर्वेन्द्रियोपपन्नाश्च वनविचारमनुविचरन्तो दर्शं दर्शमौषधान्यन्विष्य, तद्गुणसौष्ठवमसकृत्परीक्ष्य, शास्त्राणि च गुरुमुखात् श्रावं श्रावं विदित्वा कर्मदर्शने भेषजव्यवस्थापने रोगिचरित्रज्ञाने चाभीक्ष्णं प्रवर्तेरन्। न च तैरभिध्यायां विद्वेषे राजद्विष्टे वा कर्मणि कर्मणा मनसा वचसा वा बुद्धिः प्रेरणीया। सर्वेषु हि प्राणिषु बन्धुभूतैस्तैः शत्रुमित्रनिर्विशेषेण जनसेवकैः आरोग्यसम्पा-

दनादन्यत्किमपि न करणीयं भवेत्। इत्थमायुर्वेदोन्नत्यर्थं-मात्मानमुत्सृजद्भिः मैत्रीपरैस्तै इंग्लण्ड-फ्रान्स-जर्मणादि पाश्चात्यदेशं भारतवर्षस्य च प्रदेशात् प्रदेशान्तरं पर्य्यटद्भिस्तै-स्तत्रत्य पुस्तकागारेभ्यः वैद्यकग्रन्थाः बहिर्निस्सारयितव्याः। लभ्यमानाश्च चरकसुश्रुतहारीतादिग्रन्थांशाः मुद्रणव्यवस्थया लोके प्रचारणीयाः। किञ्च विदितशास्त्राणां कर्म्मकुशलानां जित-हस्तानां गुरूणामपि कुलमध्युष्य अध्ययनान्तेवासिभिरध्ययनपरैर्वा विद्यार्थिभिस्तद्विद्यसम्भाषा गुरुशुश्रूषा च विधेया। तद्विद्य-सम्भाषा हि भूयो ज्ञानाभिवृद्धिकरी भवति। गुरुशुश्रूषया च गुरवः प्रसन्नाः स्वानुभूतान्प्रयोगान्प्रकाशयन्ति। अपरमपीदं गुरुकुलवासस्य सार्थक्यं यल्लुप्तहारीत-जतूकर्णप्रभृतय बहवो दृष्ट-फलाः भेषजयोगाः शिष्यपरम्परया प्रचलन्ति भिषक्समाजे। तेषामुद्धारार्थं गुरुसेवां प्रशंसन्ति कुशलाः। अपरं च अग्निवेश-सुश्रुतादयो महर्षयोऽपि गुरुकुलाध्ययनादेव प्रकृष्टां शिक्षा-मवापुः। तस्मात्प्राच्यसभ्यतापक्षपाताः बुद्धिमन्तो भारतीयाः गुरुकुलशिक्षां न परित्यजेयुः। स्वयं राजपुरुषान् वा समा-राध्य धनादिभिरुपदेशादिभिश्च कामं भवद्भिः गुरुकुलशिक्षा-दोषाः संशोधनीयाः, परमस्य विनाशे न कथमपि यतितव्यम्।

मान्याः सभासदः!

इदं महदाशास्थानं यद् गुरुकुलविश्वविद्यालयाधिपतिभि-रत्रभवतां विश्वजनीना दृष्टिरायुर्वेदोन्नतये प्रदत्ता। मन्येऽचिरा-दितो भारतभूमिः भूपतियोग्यैः भिषग्भिः विभूषिता आत्मनीनां पुरातनीं ख्यातिं लप्स्यते।

यत:—

इत: पुराऽपि लब्धश्रीर्वेदोऽयं ब्रह्मचारिभि: ।
ब्रह्मचर्य्यविहीनानां विभ्रमाद् व्याहतिं गत: ॥
"गुरुकुल"प्रसादात्तु ब्रह्मचर्य्ये व्यवस्थिते ।
पुनर्वर्द्धिष्यते कामं ब्रह्मचारिप्रभावत: ॥

सभ्या: !

इत्यास्तां विस्तर:, केवलमाशास्महे :—

श्रियं सदा संदिशतु प्रजानां
प्रजापति: प्राणधनादिदृद्ध्या ।
भूर्भारतीया भवतात्सुखाय
शश्वच्च विश्वानि वहन्तु शान्तिम् ॥

इति शम् ।

—